No ६३३८ (प्र॰ २) धर्मशास्त्र महानिबंधः । (१)

पत्र - ३२ श्रीरघुनाथो जयति । प्रणेता गंगाराम ।

स्वतो भित्वा तत्वं श्रुतिरपि यदीयं भगवती
गुहागूढं प्रोचे सकलपुरुषार्थ्य इह यः । र्थो
विचारे सोऽशक्तान् विशदमतिदानेन सदयं
स धर्मोऽस्मान् दीनान् बहुलमनुगृह्णातु भगवान् ॥१॥

अथ प्रायश्चित्ताधिकारिणः ।

(तेषु सर्वे पापाः तद्भेदाश्च ।)

'अकुर्वन् विहितं कर्म निन्दितं च समाचरन् ।' मनुः ११ अ॰ ४४ श्लो॰

इत्यादि मानवीयादिवचोभ्यः प्रदर्शिताः पूर्वप्रकरणे ॥

तत्र प्रायश्चित्तदानमुक्तविषयमनुक्तविषयमुक्तानुक्तविषयं च

तत्राद्यं

'लोहकांस्यापहारे च द्वादशाहकणान्नता ।' इत्यादि

~~इत्यादि~~ ।

(अनुक्तविषये ~~विष्णुः~~) ( ) मनुः

'अनुक्तनिष्कृतीनां तु पापानामपनुत्तये ।
शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत् ॥ १ ॥' इति । मनुः ११ अ॰ २०८ श्लो॰

(~~[illegible]~~)

( ) ग॰पु॰पु॰ विष्णुरिति भ्रमपाठोऽस्त्यस्मृतौ वलब्धेः, मनुस्मृतौ लब्धोऽस्य वाक्यस्य ।

॥ द्वितीयं प्रकरणम् ॥ २ ॥
१ पृष्ठात् २३ पृष्ठयावत् ।
सम्पूर्णम् ॥

इति तत्प्रकल्पनं च साधारणप्रकरणादौ वक्ष्यते
उक्तानुक्तविषयं च
'यत्रोक्तं यत्र वा नोक्तमिह पातकनाशनम् ।
प्राजापत्येन शुद्ध्येत ...... ॥' इत्यादि
इत्यादि। तत्र प्रायश्चित्ततारतम्यार्थं जात्यादि निर्णीतं
नागेशेन। यथा
'षोडशवर्षन्यूनो बालः। अशीतिवर्षाधिको वृद्धः।
पूर्णषोडशवर्षस्य पूर्णं प्रायश्चित्तम्। ऊनैका-
दशवर्षस्य पञ्चवर्षादूर्ध्वं पादं प्रायश्चित्तम्।
५। द्वादशादाषोडशमर्धम्। तदपि तत्पित्रादिभिः कार्यम्।
८ एवं अशीतिरोग्यतिवृद्धयोरपि पुत्रादिभिः कार्यम्
पञ्चवर्षन्यूनस्य नापापम्।' -
अथ वर्णतः शास्त्रोपदिष्टं पूर्णप्रायश्चित्तं विप्रस्यैव।
क्षत्रियविट्शूद्राणां तु पादपादहानिः।
क्वचित् विशेषस्तु वाचनिकः। तत्र जपहोमादिरहि-
तमेव शूद्रस्य अमन्त्रकप्राणायामश्च यागाद्यनुष्ठा-

नधीतानां जपादिकम् इतरेषां तपआदि ।
नामधारकमूर्खनिर्धनानां तपः अनधीतानां च ॥
अथाश्रमतः
"षोडशवर्षाधिकब्रह्मचारिणो द्विगुणम् । वानप्रस्थस्य त्रिगुणम् । यतेश्चतुर्गुणम् । लयमपूर्णो प्रतिनिधिद्वारा प्रायश्चित्तं कार्यम् । इति ।"

(इत्यमेव प्रायश्चित्तमयूखे। अङ्गिराः)
"अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः ।
प्रायश्चित्तार्धमर्हन्ति स्त्रियो रोगिण एव च" ॥ इति । (अङ्गिराः श्लो॰ ३२)

(महाभारते आद्यपर्वण्यपि)
"आ चतुर्दशकाद् वर्षान्न भविष्यति पातकम् ।
परतः कुर्वतामेव दोष एव भविष्यति ॥"

अङ्गिराः
"अर्वाग्द्वादशाद् वर्षादशीते ऊर्ध्वमेव वा ।
अर्धमेव भवे[illegible]षां तुरीयं तत्र योषिताम् ॥" इति ।

~~इति~~। अतो वाच्यावाच्य तारतम्यं ज्ञातितो ज्ञेयम् ॥

[redacted] (यत्तु विष्णुः)

"स्त्रीणामर्धं प्रदातव्यं वृद्धानां रोगिणां तथा ।
पादो बालेषु दातव्यः सर्वपापेष्वयं विधिः ॥" ( )

एतच्च उपनयनादूर्ध्वं ज्ञेयम् । ~~शङ्खः~~ । यमः ।

"ऊनैकादशवर्षस्य पञ्चवर्षात् परस्य च ।
प्रायश्चित्तं चरेद् भ्राता पिता वान्यः सुहृज्जनः ॥ (यमस्मृ० १५ श्लो०)
अतोबालतरस्यास्य नापराधो न पातकम् ।
राजदण्डो न दातव्यः प्रायश्चित्तं न विद्यते ॥" (१६ श्लो०) इति

कुमारः

"न च मूत्रपुरीषाणां भक्षणे नास्ति कश्चन ।
दोषस्त्वापञ्चमाद्वर्षादूर्ध्वं पित्रोः सुहृद्गुरोः ॥" इति

[redacted]। गौतमः ( )

"प्रागुपनयनात्कामचारकामवादकामभक्षाः" ( ) इति ४ सूः

[redacted]। ~~कुमार~~

"सुरापाननिषेधस्तु जात्याश्रय इति स्थितिः" (इति कुमारवाक्यात्)

( ) न०मु०पु० शङ्खः इत्यशुद्धः पाठः उद्धितस्मृतावलब्धेः यमस्मृतौ (कलिकता मु०)-च दर्शनाद्यम वाक्यम् ।

( ) ~~न०मु०पु० ग० पाठो दृश्यते, नैवं गौतमस्मृतौ, तत्र तु~~ 'कामचारकामवादभक्षाः' इति पाठः स्मृतौ वर्तते।

( ) ~~गौतमवाक्ये वशिष्ठमिदम् 'अहुतो ब्रह्मचारी यथोपपादमूत्रपुरीषो भवति,' इति ॥~~

~~इति कुमारव्याख्यान~~

'अनुपेतस्तु यो बालो मद्यं मोहात्पिबेद्यदि ।
कृच्छ्रत्रयं गुरुः कुर्यान्माता भ्राता पिता तथा' बे/

इति स्मृतेश्च । अनुपेतस्य दोषोऽस्त्येवेति । विज्ञानेश्वरः ।

'एतद्वचनद्वयस्य पञ्चमवर्षप्रभृत्युत्तरपरतयाप्युपपत्तेः
तत्रानुपेतस्य दोषः । वर्षचतुष्टयपर्यन्तं न दोषः'

इति तद्युक्तम् । स्मृत्यन्तरे ।

'जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः ।
स हि गर्भसमो ज्ञेयो व्यक्तिमात्रे प्रदर्शितः ॥१॥ (दत्त० स्मृ० ४ श्लो०) ~~...~~

पेये/ भक्ष्याभक्ष्ये तथा ~~[illegible]~~ वाच्यावाच्ये ~~तथा~~नृते । अना-/
बा/ तस्मिन्काले न दोषः स्यात्स यावन्नोपनीयते ॥ २ ॥' इति (~~[illegible]~~ ८ श्लो०)

तन्मद्येतरविषयम् । इदं चार्थपादादिपरिमाणमपि हि-
मौलिकद्वादशाब्दिकाद्येवादाय प्रवर्तते न तु द्वैविया- ४/ तं/
दिनैमित्तिकद्वैगुण्यापेक्षया ब्रह्मचारित्वादिनिमित्तकं द्वै-
गुण्याद्यपेक्ष्य । अर्थपादद्वैगुण्यत्रैगुण्यादिविधीनामुपजीव्यो- ए/
पजीवकभावाभावेन परस्परालोचनया मौलिकविधिमा-

( ) ज० ^मात्र (मु० पु० प्रदर्शित) इति पाठः ॥ ~~स्मृतौ तु 'मात्र' इति पाठोऽस्ति~~ ॥

( ) ज० ज्ञेये इति पाठो ~~पार्थक्यो वर्तते स्मृतौ 'पेये' इति पाठदर्शनात्~~ ॥ ।

( ) ज० तथानृते इति पाठो ~~संबद्धः स्मृतौ तु 'कृतानृते' इति शुद्धपाठो वर्तते~~ ॥ ।

( ) ज० काले इति पाठः ~~कल्पितः प्रतिभाति, स्मृतौ 'बाले' इति शुद्धपाठदर्शनात्~~ ॥

( ) ज० ~~दोषः स्यात् इति पाठः, स्मृतौ तु 'दोषोऽस्ति' इति पाठः~~ ॥

वालोचनेनैव प्रवृत्तेः ॥

अथ कामाकामकृतप्रायश्चित्तव्यवस्था ।

"अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः ।
कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात् ॥ १॥ (मनुः ११अ० ४५ श्लो)
अकामतः कृतं पापं वेदाभ्यासेन शुध्यति ।
कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैः" ॥ २॥ ११- ४६

अनयोरर्थः । अकामतोऽनिच्छातः कृते पापे प्रायश्चित्तं भवतीति पण्डिताः । कामतः कृतेऽपि भवतीत्येके । अत्र हेतुः "श्रुतिनिदर्शनात्" । एतच्च प्रायश्चित्तगौरवार्थम् । श्रुतिश्च ।

"इन्द्रो यतीन् सालावृकेभ्यः प्रायच्छत् तमश्लीला वागभ्यवदत् स तु प्रजापतिमुपाधावत् तस्मा उपहव्यं प्रायच्छत्" ॥ इति

। अस्यार्थः । इन्द्रो यतीन् बुद्धिपूर्वकं श्वभ्यो दत्तवान् ततो लोकास्तमनिन्दन् ततः स प्रायश्चित्तार्थं प्रजापतिसमीपमगमत् । तस्मै प्रजापतिरुपहव्याख्यं कर्म प्रायच्छत् दत्तवान् । अतः कामतः कृतेऽपि

अस्ति प्रायश्चित्तम् । तत्प्रायश्चित्तमपि दर्शयति ‘उपहव्यं हि
प्रायश्चित्तार्थी कर्म’ । तच्च आपस्तम्बीयब्रह्महप्रकरणे ज्ञेयम् ।
‘अकामतः’ इति । अनिच्छातः कृते पापे वेदाभ्यासेन प्र-
तिदिनं क्रियमाणेनापि पापी पुरुषः शुध्यति । एतच्च
कामकृते पापे गुरुतरप्रायश्चित्तापेक्षयाल्पतरविधाना-
र्थम् । तत्र हि मोहादिव्यामूढतया कृते नानाविधं वि-
शोधनतपःस्वरूपं गुरुतरमेव प्रायश्चित्तमुक्तम् । अका-
मे लघुप्रायश्चित्ताधिकारी । सकामे गुरुप्रायश्चित्ताधिका-
रीत्यधिकारिप्रकरणे प्रायश्चित्तकथनमयुक्तम् इति नाश-
ङ्कनीयम् । अत एव बृहस्पतिः ।

‘कामाकामकृतं त्वेवं पातकं द्विविधं स्मृतम् ।
पुरुषापेक्षया चैव निष्कृतिर्द्विविधा स्मृता ॥ (॥’ इति

इति । कामकृते महापापे तु मरणमेव प्रायश्चित्तमुक्तम् ~~[illegible]~~ वृद्धहारीतेन

‘यः कामतो महापापं नरः कुर्यात्कथंचन ।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥ (॥’ इति (वृद्धहारीतस्मृतौ ६ अ० २३२ श्लो०)

इति । यत्तु

‘इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् ।
कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते ॥’ (मनु: ११ अ० ८९ श्लो०)

कामकृते प्रायश्चित्ताधिक्यमाह
~~अङ्गिरा:~~ (अग्निपुराणे (१७३ अ० ४ श्लो०)
(‘विहितं यदकामानां कामात्तद्द्विगुणं भवेत् ।’ इति

~~“षड्भिर्वर्षैः शुद्धचारी ब्रह्महा पूयते नरः” अस्य पद्यस्य पूर्वभागः (अग्निपु० अ० १७३ श्लो० ८)।~~

( ) ज० मु० पु० अङ्गिरा इत्यशुद्धः पाठ ... अग्निपुराणे लब्धश्च । स्मृतौ च ‘शुद्धिर्निर्दिष्टा’ इति पाठः स्मृतौ ।

~~ज० मु० पु० ‘निष्कृतिर्दृष्टा’ इति पाठः~~

( ) ज० मु० पु० तेनैवेत्यङ्गिराः स्मृतिनिर्देशोऽशुद्धः वृद्धहारीतस्मृतावस्य वाक्यस्य दर्शनात् ।

( )

इति मानवीयं तदियमिति सर्वनामपरामृष्टद्वादशवार्षिक-
व्रतमेव निषेधति न प्रायश्चित्तमात्रं पूर्वोक्त (वृद्धहारीत-) वचनात् ॥ (या०)

अथ बुद्धिपूर्वं कृतब्रह्मवधादिर्यथाशास्त्रं द्विगुणप्राय-
श्चित्ताचरणेनेह व्यवहार्यतामापद्यते नवा इति विप्रतिपत्तौ
केषांचित् विधिकोटिः केषांचिच्च प्रतिषेधकोटिः। तत्र प्रथमे।

"प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।
कामतो व्यवहार्यस्तु वचनादिह जायते ॥ (१)" (३ अध्या० ५ प्रक० २२६ श्लो०)

इति याज्ञवल्क्यवचनेन बुद्धिपूर्वं ब्रह्मवधे प्रायश्चित्तेन व्य-
वहार्यतामात्रं न त्वेनसोऽपगमः ॥ [न] चैनसोऽनपगमे
व्यवहार्यतापि न संभवतीति वाच्यम्। वचनादेव तादृ-
शपातकिसंसर्गस्य दोषप्रयोजकत्वाभावकल्पनात्।
'किं किं हि वचनं न कुर्यात् न हि वचनस्यातिभारः' इति-
न्यायात् स्पष्टं चैतन्मिताक्षराप्रभृतिनिबन्धेष्वित्या-
हुः। [अ]न्ये तु प्रदर्शितवचने 'अव्यवहार्य' इतिच्छेदः
'कामतः' इत्यस्य कामतः कृतमपीत्यर्थः। तथा च
कामतो ब्राह्मणवधे प्रायश्चित्ताचरणेन नरकनिवृत्तावपि

( ) ज०मु०पु० अङ्गिरो वचनादिति पाठो ष्टुद्धः।

इह लोकेऽव्यवहार्यो जायते इति पर्यवसितोऽर्थः । वच-
नं तत्र मानवम्

'बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः ।
शरणागतहन्तृंश्च स्त्रीहन्तृंश्च न संवसेत् ॥' इति (मनुः ११ अ १९० श्लो०)

इति । 'बहिस्तूभयथापि स्मृतेराचाराच्च' इत्यधिकरणस्थब्रह्ममी- (ब्रह्मसूत्र ३ अ० ४ पा० ४३ सू०) इ-
मांसाभाष्यवाचस्पत्याद्यारूढं चाव्यवहार्यत्वम् । मिताक्षरा-
व्याख्या तु नात्र शुद्धा तन्मते 'कामत' इत्यस्य कामतः
कृतं नापैतीत्यर्थकतया तत्र नञोऽध्याहारस्वीकारस्या-
वश्यकतया गौरवापत्तेः । किं च अस्मदीयव्याख्याने
'वचनादिह जायते' इत्यत्राव्यवहारे संवादि 'बालघ्नांश्च'
इत्यादिमनुवचनमुपलभ्यते । न तु मिताक्षराव्याख्याना-
नुसारिव्यवहार्यत्वे किमपि वचनमुपलभ्यते । किं च
(याज्ञ० ३ अ २२६ श्लो०)
'प्रायश्चित्तैरपैत्येनः' इत्यतः पूर्वस्मिन् 'महापातकजै-
श्चैरैरुपपातकजैस्तथा अन्विता यान्त्यचरितप्रायश्चित्ता नराधमाः'

~~'महापातकजैर्घोरैरुपपातकजैस्तथा ।
अन्विता यान्त्यचरितप्रायश्चित्ता नराधमाः ॥'~~

'महापातकजैर्घोरैरुपपातकजैस्तथा ।
(च) अन्विता यान्त्यचरितप्रायश्चित्ता नराधमाः ॥' याज्ञ० अ० ३ प्र० ६ श्लो० २२६

इति वचनेन अनाचरितप्रायश्चित्तानामेव नरकप्राप्तिर्बोध्यते यदि च कामकृतमहापातकस्य प्रायश्चित्ताचरणेऽपि नरकप्राप्तिः स्यात् तर्हि तद्विरोधः स्पष्ट एव तस्मात्

'दशाहोर्ध्वं स्नानमाचम् ...'

इत्यशौचप्रकरणस्थमिताक्षरोक्तेः माधवविरोधादुपेक्षावत्। पुराणप्रथितसाक्षाद्भगवदवतारश्रीमदाचार्यभाष्यवाचस्पत्यादिविरोधात् प्रकृतमपि व्याख्यानमुपेक्षामेव अर्हति। अत एव

'यः कामतो महापापं नरः कुर्यात्कथंचन।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते॥' वृद्धहारी॰ अ॰ ६ श्लो॰ २३२

इति वचनेन।

'कामान्तद्द्विगुणं भवेत्' (अत्रि पृ॰ १८३ अ॰ ७ १४ श्लो॰)

इति वचनस्य समानफलकता भवति। अन्यथा तस्य पारलौकिकशुद्धिबोधकत्वम् अस्य तु ऐहिकशुद्धिबोधकत्वम् इति वैरूप्यं स्यात् न हि 'व्रीहिभिर्यजेत यवैर्वा' इत्यादौ विभिन्नफलकत्वं दृष्टं तस्मात् अव्यवहार्यतैव विचारसहा नेतरा इति संगिरन्ते॥

अत्र ब्रूमः कृतद्विगुणप्रायश्चित्तानां महापातकिनां पातकनाशाभावकल्पनमेव युक्तियुक्तम्। सति हि त[illegible]न्नाशे तत्संसर्गस्य पापजनकतायाः कथमपि वक्तुमशक्यत्वात्। तथा हि चेतनविशेषगुणसामान्यस्य सहसमभिव्याहृतचेतनान्तरसंक्रान्तित्वेन तावदौत्सर्गिकं नियतम्। प्रसिद्धमत्रान्वयव्यतिरेकानुविधानम्। यद्बन्धुषु इष्टविशेषवियोगानिष्टविशेषप्राप्तिहेतुकदुःखेन रुदत्सु तादृशदुःखहेतुशून्योऽपि तत्र उपगतस्तैः सहैव रोदिति। उद्विग्नमना अपि शान्तैर्धीरैः [illegible] सह आसीनः सुखमुपलभते। उदासीनोऽपि विषयविशेषे तत्कामुकमण्डलीसहचरितस्तमेव विषयविशेषं निर्भरेण कामयते। किं बहुना। जडेषु अपि शरीरादिषु संसृष्टशरीरान्तरसंचारिरोगविशेषाणां संक्रामो दृश्यते। इत्थं च संसर्गस्य लोकतः प्रसिद्धमेव विशेषगुणसंक्रान्तिहेतुत्वं गुणविशेषमपरमधिकृत्य

"संसर्गश्चापि तैः सह" (मनु० ११अ० ५४ श्लो० ४ पादः)

इति प्रभृतिवचनजातेन अवबु[illegible]त्वानूद्यते [illegible] इत्येव लाघवात् कल्पयितुं युक्तम्। कृतप्रायश्चित्तपापसंसर्गोऽपि

स्वसहासीन

पापजनकत्वस्य विनैव पापसंक्रान्तिं स्वातन्त्र्येण पापजन-
कत्वस्य च तत्तद्वचनाभिप्रायविषयत्वकल्पनायां प्रसिद्धका-
र्यकारणभावाननुगृहीतपूर्वार्थप्रतिपादकत्वप्रयुक्तं महदेव
[illegible] गौरवम् । अत एव

'पतितैः संप्रयुक्तानामिमाः शृणुत निष्कृतीः । ॥ अ० ११ श्लो० ॥
यो येन पतितेनैषां संसर्गं याति मानवः ॥ (॥ ११ अ० १८१ श्लो०)
स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये' ॥ १८१ ॥

इति मनुना ।

'संसर्गी येन संसर्गं कुर्यात्तद्व्रतमाचरेत् ॥' इति
इति जाबालेन च तत्तत्पापप्रायश्चित्तमेव तत्तत्संसर्गिण
उक्तं संगच्छते ।

ननु कृतप्रायश्चित्तसंसर्गस्यापि पापसंक्रान्त्युपधायकत्वं
कस्मान्न स्यात् भवन्मये पापस्य सद्भावात् इति चेत् । न
रसायनविशेषोपयोगस्य रोगविशेषसंक्रान्तिप्रतिबन्ध-
कत्ववत् अतिशायितविवेकवत्त्वादेः दुःखादिसंक्रान्तिप्र-
तिबन्धकत्ववच्च प्रायश्चित्ताचरणस्य पापसंक्रान्तिं प्रति
प्रतिबन्धकत्वकल्पनात् ।

[संवत्सरेण पतति पतितेन सहाचरन् ।
याजनाध्यापनाद्यौनान्न तु यानासनाशनात् ॥ १८०]

( ) न० मु० पु० 'संवत्सरेणे'त्येकः श्लोको नोपलभ्यते ।

ननु तत्तत्संक्रान्तिं प्रति तस्य तस्य विवेकादेरनुगतानतिप्रस-
क्तस्य प्रतिबन्धकतावच्छेदकस्य अहंभवेन प्रातिस्विकरू-
पेणैव प्रतिबन्धकत्वं वक्तव्यम्। ततश्च प्रकृतदुरितसं-
क्रान्तिप्रायश्चित्ताचरणयोस्तादृशप्रतिबध्यप्रतिबन्धकभा- भावावच्छेदका
क्रान्ततया अपूर्व एव प्रतिबध्यप्रतिबन्धकभावो वचनब-
लादेव कल्पनीयः तत्र किं गौरवम्, कृत-
प्रायश्चित्ताचरणस्य निष्पापस्यापि तस्य संसर्गे पापजनकत्व-
कल्पनायामिति चेत्। न। भवन्मते तादृशप्रायश्चित्ताच-
रणस्य पापनाशकत्वं तादृशप्रायश्चित्ताचरणविशिष्टनाश-
स्य च संसर्गिपापजनकत्वम् इति कल्पनाद्वयम्।
अस्माकं तु संक्रान्तिप्रतिबन्धकत्वमेकमेव तादृशप्राय-
श्चित्ताचरणस्य इति लाघवस्य सुवक्तव्यत्वात्।
किं च। कृतद्विगुणप्रायश्चित्तनिष्पापसंसर्गिणः किं प्राय-
श्चित्तं भवद्भिः कल्प्यताम्। न तावद्यादृशपापापनोदकं प्रायश्चि-
त्तं तेनाचरितं तस्य ब्रह्मवधादेः पापस्यानन्तरीयांशम्
तादृशपापवैशिष्ट्यस्य तस्यां व्यक्तौ संसर्गकालावच्छे-

देन अस्मत्वेन तादृशप्रायश्चित्ताप्राप्तेः। तत्पापोपलक्षित तस्य
तादृशप्रायश्चित्तप्रयोजकतावच्छेदकत्वे भूतभविष्यत्कालवृत्ति-
नोऽमतिपूर्वकस्यापि पापस्य तत्प्रयोजकतावच्छेदकत्वापत्तेः।
भवन्मये तदानीं तस्मिन् पुरुषे पापाभावेन पतितत्वस्य (मनु० ११अ० १८१श्लो०)
कथमपि वक्तुमशक्यतया 'यो येन पतितेनैषाम्' इत्या-
दिशास्त्रीयप्रायश्चित्तविधेयहृद्देश्यतावच्छेदकाक्रान्तत्वस्य तत्सं-
सर्गिणि कथमपि वक्तुमशक्यत्वात्। ततश्च अपूर्वमेव
प्रायश्चित्तमनुकन्यायेन किमपि कल्प्यम्। तथा च
महान् लौकिकशास्त्रीयव्यवहारव्याकोपः।
ननु अस्तु प्रायश्चित्तेन पापनाशाभावः तथापि भवन्मये
प्रायश्चित्ताचरणस्य पुरुषान्तरसंक्रान्तिप्रतिबन्धकत्ववत्
अस्माभिर्नरकं प्रत्येव प्रतिबन्धकत्वं कल्प्यते, स्वीक्रियते च
तस्य संसर्गिणि पुरुषान्तरे संक्रमः इति सर्वमवदातम्
इति चेत्। हन्त भोः तत्संसर्गस्य किमिति वर्जनीयत्वम्
स्यात्। पापहेतुत्वेन इति चेत्। न हि मूल एव प्रा-

पापस्यापि केन हेतुना वर्जनीयत्वम्, यतस्तदनर्थं प्रसोष्यति -
इति चेत्

यश्चित्ताचरणेन पर्णापूर्वतां प्राप्तस्य तस्य अन्यत्रापि
तादृशस्यैव संक्रान्तस्य नरकोत्पादकताया असंभवात्,
अतोऽन्यदेव स्वतन्त्रं किमपि दुरितमुत्पद्यते इतिव-
क्तव्यम् । ततश्च पुनरायातः प्रदर्शितदूषणगणग्रासः
इति न किंचिदेतत् । अपि च ।

'यः कामतो महापापं नरः कुर्यात्कथंचन ।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥' इति (वृद्धहारीतस्मृ० ६ अ० ३३२ श्लो०)

~~इति~~ अनेन कामतः कृतस्य महापापस्य निष्कृतिः
प्राणान्तप्रायश्चित्तेतरेण प्रायश्चित्तेन न संभवति
इति स्पष्टं प्रतिपाद्यते । निष्कृतिश्च अत्र नाशः
अन्यस्यासंभवात् । ततश्च द्विगुणप्रायश्चित्तस्य
तन्नाशकत्वकल्पने ~~[illegible]~~ ।
'न तस्य' इत्यादिविरोधः स्पष्ट एव ।
अथ उच्येत भृग्वग्निपतनपदेन द्विगुणंप्रायश्चि-
त्तमपि उपलक्ष्यते इति । तर्हि तत्पापप्रणाशक-
त्वेन संभाव्यमानानि सर्वाण्येव तुल्यन्यायादुप-

लक्षणीयानि स्युरिति किम् अवशिष्यते तत्र सुद-
र्शनीयम् येन 'न तस्य' इत्यादेः सार्थक्यं
स्यात् । अस्माकं द्विगुणप्रायश्चित्ताचरणं । प्रकृते पा-
पसंक्रमाभावमात्रप्रयोजनकम् । न तु पापनाशप्र-
योजनकम् इति न तद्विरोधगन्धोऽपि । एतेन 'अ-
व्यवहार्य' इति च्छेदे 'वचनादिह' इत्यत्र व-
चनं 'बालघ्नांश्च' इत्यादि मानवमुपलभ्यते ।
'व्यवहार्य' इति च्छेदे तु न किमपि इति परास्तम् ।
व्यवहार्यतायाम् ।

'विहितं यदकामानां कामात्तद्द्विगुणं भवेत्' (अग्निपु॰ १८२अ॰ ४श्लो॰)
इत्यस्यैव वचनस्य सद्भावात् ।

ननु इदं पापसामान्यविषयकम् न तु महापापा-
नि अत्र प्रातिस्विकरूपेण निर्दिश्यन्ते । इति
चेत् 'बालघ्नांश्च' इत्यत्रापि क्व निर्दिश्यन्ते । प्रत्युत
अत्र सामान्यधर्मपुरस्कारेण निर्देशाद्वाच्य इत्यैव

~~२८ प्रधानम्~~

तानि प्रतिपाद्यन्ते ('बालघ्नांश्च' इत्यत्र) कस्यापि महापापस्य अ-
निर्देशेन कथंचित् उपलक्षणभावेन परमजघन्यया वृत्त्या इति
अतीव विप्रकृष्टं वचनमिदं भवन्नये-

'कामतो द्विगुणं प्रोक्तं पूर्वेषु च यदुच्यते ।'

इति केशववैजयन्त्याम् । नन्दपण्डितधृतव्यासवचनेन महापाप-
परं पूर्वपदमुपलभ्यतेऽपि । किं च स्मृतिघटकस्य अस्य वचनात्-
इत्यस्य वेदवचनात् इत्येवार्थो न तु स्मृतिवचनादिति
स्मृतीनां वेदमूलकत्वेनैव प्रामाण्यात् ततश्च वचनोपलम्भोऽ-
ऽपि न अतीव अत्रोपयुज्यते ।

वस्तुतः तु 'बालघ्नांश्च कृतघ्नांश्च' इत्यादिवचनम् अकामतः
कामतो वा कृतैतच्चतुष्टयान्यतमपापकेन सह संसर्गं प्रतिषे-
धतीत्येव युक्तम् कामत इत्यनुपक्रमात्

'एनस्विभिरनिर्णिक्तैर्नार्थं किंचित्सहाचरेत् ।
कृतनिर्णेजनांश्चैव न जुगुप्सेत कर्हिचित् ॥' (मनु० ११अ० १८९श्लो०)

इति पापिसामान्यस्यैव उपक्रमात् ॥ विष्णुस्मृतिभाष्ये
केशववैजयन्त्यामपि 'पापचतुष्टमात्रविषयकोऽयं वाचनिकः
संसर्गप्रतिषेधः इत्येव व्यवस्थापनाच्च' इति बोध्यम् ।
यदुच्यते मिताक्षराकारव्याख्याने । 'कामतः' इत्यत्र नञ-
ध्याहारप्रयुक्तं गौरवम् इति तन्न युज्यते न अत्र नञोऽ-
ध्याहारस्य शङ्कापि संभवमर्हति । तथा हि प्रतिषेधा हि
स्वसाफल्याय अवश्यं प्रतिषेध्यप्राप्तिमपेक्षन्ते । प्राप्तिश्च थ-

शास्त्रैकप्रामाणिता

र्मधर्मयोरलौकिकत्वात् प्रकृते शास्त्रैकप्रामाणिता वाच्या। शास्त्रं तु 'प्रायश्चित्तैरपैत्येनः' (याज्ञ० ३ अ० २२६ श्लो०) इति श्लोकार्धम् अज्ञानकृतत्वेनैव दुरितं विषयीकरोति। न ज्ञानकृतम्। इत्थं च प्रकृतप्रतिषेध्यस्य शापकप्रमाणोद्देश्यतावच्छेदकस्पर्शस्यापि असंभवेन केन हेतुना भावत्कगौरवोद्भावनमात्रप्रयोजनकं नञध्याहारं मिताक्षराकार उररीकुर्यात्। प्रत्युत भवद्भिरेव 'कामतः' इति कामतः कृतमपि' इत्यर्थकतया व्याचक्षाणैरपि' शब्दस्य अध्याहारः पूर्ववाक्यघटकस्य 'प्रायश्चित्तैरपैत्येनः' इत्यस्य अध्याहारविशेषात्मानुषङ्गः पूर्ववाकीयोद्देश्यतावच्छेदकाज्ञानकृतत्वापेक्षया कामतः कृतत्वस्यात्यन्तविरुद्धत्वेन तदवच्छिन्नोद्देश्यताभेदाद् विधेयभेदः

अथ च 'वाक्यभेदो व्यवहार्यः' इत्यत्र नञः प्रश्लेष इत्यादिः मिताक्षरानुसारिभिरुद्भाव्यमानो भवद्व्याख्याने गौरवगणः कथं प्रत्याख्यायताम्। कामतः कृतस्यापि प्रायश्चित्तेन नाशे योगीश्वरेण 'यदज्ञानकृतं भवेत्' ~~[illegible]~~ इत्यनुक्त्वैव सामान्यरूपेणैव उभयं संग्राह्यमासीत् तत् किमर्थं मुनिः कोटिद्वयपुरस्कारेण निरदिक्षत् इति पर्यनुयुक्तैश्च किमुच्यताम्। अस्माभिस्तु 'न तस्य निष्कृतिः' इत्युदाहृतवचनानुरोधेन प्र-/त्याद्युक्तवचनम् अज्ञानकृतस्य पापस्य नाशः प्रायश्चित्ताचरणेन जीवच्छरीराविरोधेन भवति। कामतः कृते तु इह व्यवहा-

(प्र.२)

र्यता वचनाद्भवति इति व्याख्यायते इति सकलमकलङ्कम् ॥

यदपि 'महापातकजैर्घोरैः' (याज्ञ० ३अ०२२४श्लो०) इत्यादिपूर्ववचनेन अनाचरितप्रायश्चित्तानामेव नरकप्राप्तिर्बोध्यते, कामं कृते कृतप्रायश्चित्तस्यापि नरकस्वीकारे तद्विरोधः स्पष्ट एवेति ।

~~तद्विरोध~~

तत्रेदं विचार्यताम् 'दुरितैरन्विता अकृतप्रायश्चित्ता नरकं यान्ति' इत्यत्र प्रायश्चित्तपदेन यत् किमपि प्रायश्चित्तं विवक्षितुमशक्यम् तथा सति ब्रह्मघ्नः कृतपञ्चाब्दभक्षणप्रायश्चित्तस्य नरकबोधकत्वानुपपत्तेः । किं तु यादृशपापनाशकत्वेन यत्प्रायश्चित्तं विहितं तदाचरणकर्तृत्वाभाववत्तत्पापवद्योज्यो नरको भवति इति व्याख्येयम् ।

प्रकृतपापस्य तु भृग्वग्निपतनमेव नाशकम् इति 'न तस्य निष्कृतिः' (इ०हा० ६अ०३३२श्लो०) इत्यादिना बोधितम् । इति तन्नाशकत्वेन अविहिते केवलम् ऐहिकव्यवहारमात्रोपयोगिनि द्विगुणप्रायश्चित्ते कृतेऽपि नरकप्राप्तौ व्यवस्थाप्यमानायां कस्तद्विरोधः । प्रत्युत तत्पापनाशकद्विगुणप्रायश्चित्तम् आचरितवतो नरकाभावं कल्पयतां भवताम् एतद्विरोधः ।

किं च इदं वाक्यं कृतदुरिताकृतप्रायश्चित्तान् उद्दिश्य नरकप्राप्तिं विधत्ते । तत्र उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयस्वीकारेऽपि तादृशोद्देश्यवृत्ति विधेयभूतनरकप्राप्त्यभाव एव

(प्र·२)

व्युदसनीयः । न तु उद्देश्यतावच्छेदकाभावसमानाधिकरणं
विधेयमपि तस्य वाच्यमर्यादया सलाभात । प्रत्युत 'न
तस्य निष्कृतिः' इत्यादि विरोधात बाधितमेव इत्यनुपद-
मेव उपपादितम् ।

यच्च व्यवहार्यत्वे ब्रह्ममीमांसाभाष्यविरोधोद्भावनं तदभ-
सात । इत्थं हि 'बहिस्तूभयथापि स्मृतेराचाराच्च' (३ अ० ४ पाद ४३ सू०) इति
सूत्रे श्रीमदाचार्यभाष्यम्

यद्यूर्ध्वरेतसां स्वाश्रमेभ्यः प्रच्यवनं महापातकम्
यदि वा उपपातकम् उभयथापि शिष्टैस्ते बहि-
ष्कर्तव्याः ।

'आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः ।
प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा ॥' (अत्रिस्मृ० २६८ श्लो०) इति
~~इति~~ ।

'आरूढं पतितं विप्रं मण्डलाच्च विनिःसृतम् ।
उद्बद्धं कृमिदष्टं च स्पृष्ट्वा चान्द्रायणं चरेत् ॥' इति च

~~इत्यादि इति च~~ । एवमादिनिन्दातिशयस्मृतिभ्यः शिष्टाचाराच्च
नहि यज्ञाध्ययनविवाहादीनि तैः सहाचरन्ति शिष्टाः इति अत्र-
'ते' 'तैः' इत्याभ्यामूर्ध्वरेतस एव प्रतिपाद्यन्ते इति स्पष्टमेव
उपक्रमाच्च ।

इत्थं च एतत्सन्दर्भगतभाष्यग्रन्थीयेन केनापि अंशेन सार्धं
मिताक्षराग्रन्थस्य न विरोधगन्धसंभावनापि इति किंच

( ) 'आरूढो नैष्ठिकम्, इति पद्यमत्रिस्मृतौ शातातपस्मृतौ च वर्तते परं तु तत्रोत्तरार्धभागः
'चान्द्रायणं चरेन्मासमिति शातातपोऽब्रवीत्, इत्येवं-विधपाठोऽस्ति ।

विभीषिका पुराणप्रथितसाक्षाद्भगवदवतारश्रीमदाचार्यभाष्यवि-
रोधारोपरूपा । तादृशबोधे तद्वाक्यस्य व्युत्पत्तिविरहाच्च । प्रकृ-
तवाक्यार्थचरकार्थप्रतिद्वन्द्विभावेन कृतप्रायश्चित्तेषु नरकाभावा-
क्षेपोऽपि बाधकविरहापेक्षत्वात् पाक्षिकः इति—
प्रकृते सति बाधके कथमवकाशं लभेत । न हि अपक्वो
रसालोऽम्लो भवत्येव इत्युक्ते पक्वोऽम्लो नैव भवतीति श-
क्यते प्रतिपत्तुम् इति ।

यदपि भृग्वग्निपतनाद्युभयप्रायश्चित्तयोः समानफलकत्वा-
नुरोधेन अव्यवहार्यत्वं व्यवस्थापयितुमिष्यते तदपि न समी-
चीनम् 'व्रीहिभिर्यवैर्वा' इत्यादौ हि विभिन्नफलकत्वकल्प-
ने व्रीहियागेन स्वर्गं भावयेत् यवयागेन प्रजां भावयेत्
इत्यादिप्राप्त्यबोधे सकृत् श्रुतेन यजत्युत्तरलिङा तादृशभाव-
नाद्वयबोधानुपपत्त्या वाक्यभेदापत्तिरिति समानफलक-
त्वम् आवश्यकम् । परं यत्र हवनीयद्रव्यप्रतिपादकानि नानैव
वाक्यानि तत्र विभिन्नफलकत्वे को दोषः ॥ का वा वाचोयुक्तिः समानफलकत्वे ॥
यथा 'दध्नेन्द्रियकामस्य आज्येन जुहुयात्तेजस्कामस्य'
इत्यादौ । इत्थं च प्रकृते तयोः प्रायश्चित्तयोः समान-
वाक्यप्रतिपादितत्वाभावेन समानफलकत्वं नावश्यकम् ।

अथ वाचस्पति-कल्पतरुविरोधात् मिताक्षरायाश्चेत् अप्रामा-
ण्यं तर्हि मिताक्षराविरोधाद् वाचस्पति-कल्पतर्वोरेव-

अप्रामाण्यं कस्मात् न स्यात् । युक्तं तु तयोरेव अप्रामाण्यम् तयोर्ब्रह्मविचारार्थं प्रवृत्तयोस्तदंशो आप्ततमत्वेऽपि प्रकृत~~तद्~~ विषये तद्ग्रन्थस्य प्रासङ्गिकत्वात् । मिताक्षराकारस्य तु धर्मविचारमात्रोद्देशेन प्रवृत्तस्यैव अत्राप्ततमत्वात् 'यत्परः शब्दः स शब्दार्थ, इतिन्यायात् ।

अथ मिताक्षराग्रन्थ एकः तौ तु द्वौ इति संख्याधिक्यप्रयुक्तं प्राबल्यम् इति चेत् हेतुविधया युक्तत्वव्यवस्थापने संख्याधिक्यं केन प्रकारेण उपयुज्यताम् । संख्याधिक्ये एव चेत्परितोषः तर्हि दृश्यन्तां नृसिंहप्रसादमदनरत्नादयः परमप्राचीना निबन्धाः । माधवाचार्याणामपि व्यवहार्यत्व एव निर्भरो लक्ष्यते । यतस्तन्मतं यथोपपत्तिभिर्विशदं प्रतिपादितं तैः ~~नैकै~~नान्यथा नापरं केचिदित्युपक्रम्य प्रतिपादनं तु नानभिमतत्वे लिङ्गम् । केचिदित्यादिनापि सिद्धान्तप्रतिपादनस्य बहुशो निबन्धेषु दृष्टत्वात् + मतान्तरस्य, वस्तुतस्तु सिद्धान्तस्त्वित्यादिना प्रतिपादन एव केचित्त्वित्यादिना प्रतिपादितेऽनभिमतत्वदर्शनात् । प्रकृते च अपरे त्वित्यादिना मतान्तरस्य प्रदर्शनेन तत्र निर्भरस्यानुमातुमशक्यत्वात् इत्यलमनया निःसारचर्चया ।

तस्मात् कामकृतब्रह्मवधोऽप्यत्यन्तपश्चात्तापादिरूपं प्रायश्चित्तार्हतां सम्यग्विभाव्य रागद्वेषौ विहाय आत्यन्तिककायक्लेशकरचतुर्विंशत्यब्दव्रतात्मनायोपदेशेन चेदनुगृह्येत स च यथोपदिष्टं तद्धर्मतोऽनुतिष्ठेत् तर्हि स पावनाशाभावेऽप्यैहिकव्यवहारार्हः संपद्येतैव इति सिद्धम् ।

श्रीमत्प्रोद्यतरश्रतापतपनत्रस्तारिव्रजानन-
जम्बूपत्तनतिब्बतक्षितिपतेर्धर्मस्य साक्षात्तनोः ।
भूपालावलिमौलिलाल्यचरणात् काश्मीरदेशेश्वरात्
स्वान्तं श्रीरणवीरसिंहनृपतेः प्राप्यार्थिचिन्तामणेः ॥

पर्यालोचितधर्मशास्त्रनिवहैरेतत्सभासंगतै-
र्गङ्गारामकवीशमुख्यविबुधैर्यः संगृहीतः श्रमात् ।
प्रायश्चित्तविनिर्णये प्रकरणं तस्मिन्बुधानन्ददे
संप्राप्नोदधिकारिवर्णनमुखं सिद्धिं द्वितीयं शुभम् ॥

इति श्रीमन्महाराजाधिराजजम्बूकाश्मीरतिब्बताद्यनेकदेशाधीशप्रभुवररणवीरसिंहाज्ञप्तकविगङ्गारामसंगृहीते धर्मशास्त्रमहानिबन्धे प्रायश्चित्तभागेऽधिकारिप्रकरणं द्वितीयम्

(घ-१) ..   (२४)

(तृतीयप्रकरणे)

पृष्ठसं.	(प्रामाणिकनामानि)	प्रमाणप्रतीकाः	
१	अङ्गिराः	उदयन्तं न यदादित्यः	(१)
२	यमः	तपसा ते विशुद्ध्यन्ति	(२)
	चतुर्विंशतिमते	यथा भूमिगतं तोयं	(५)
३	मनुः	अस्नानादशुचि वा स्नानात	(१)
	अङ्गिराः	अत ऊर्ध्वं प्रवक्ष्यामि	(१० १/२)
४	?	तेहि पापकृतो वेद्या	
५	पराशरः	वेदवेदाङ्गविदुषां	(१)
	?	शुना लीढं हविर्यथा	
	माधवनन्दपण्डितौ ?		
	पराशरः	सावित्र्याश्चापि गायत्र्या	(४)
	गायत्री श्रुतिः ?	चतुर्विंशत्यक्षरा गायत्री	
	(मा)नन्दपण्डिताः	पुनरुपनयने उपदेश्या	
६	व्यासः	ब्रह्मबीजसमुत्पन्नो	
	चतुर्विंशतिमते	गर्भाधानादि संस्कारैः	
७	पराशरः	अव्रतानाममन्त्राणाम्	(१)
	चतुर्विंशतिमते	वेदपारमतीता ये	(२)
	पाराशरः	पशवो दुष्टकर्माणः	(१)
८	पराशरः	यद्वदन्ति तमोमूढाः	२
	?	ऋषिवक्त्रोद्गतान् धर्मान्	१/२
९	? (अङ्गिराः)	वचः सर्वमुदाहार्यम्	(१)
	विद्वन्मनोहरायां	पूर्वोक्त द्विविधाज्ञानवतां	
	वृद्धशातातपस्मरण	पठितं धर्मशास्त्रेण	(१)
	?	अज्ञात्वा धर्मशास्त्राणि	(१/४)
	पराशरः	चत्वारो वा त्रयो वापि यं ब्रूयुः	(१)
		पापमार्गं मार्गन्तो	(१)
		धायकैरपि	
		यथा भूमिगतं तोयम्	२
		त्मकृच्छ्रं ततः कुर्यात	१/२
		(चत्)वारो वा त्रयो वापि वेदवन्तः	(४)
१२		(य)थावन्तः श्रोत्रिया	(१)
	बृहस्पतिः	लोकवेदान्ततत्त्वज्ञाः	(१)

तृतीयं प्रकरणम् एकादारभ्य चतुष्पञ्चाशत्पृष्ठान् यावत् ससूचीकम् सूचीसंख्या ८

तृतीयप्रकरणे

पृ.	प्रामाणिकनामानि	प्रमाणप्रतीकाः	
१३	अङ्गिराः	स्नातको वा त्रयो वापि	(४ १/२)
	मनुः	त्रैविद्यो हैतुकस्तर्की	(१)
	अङ्गिरःपराशरौ	चातुर्विद्यो विकल्पी च	(१)
	अङ्गिराः	एकविंशति संख्याते	(१)
१४	यमः	एको द्वौ वा त्रयो वापि	(१)
	मनुः	ऋग्वेदविद्यजुर्विच्च	(३)
	धर्मविवृतौ	पातकेषु शतं पर्षत्	(१)
	अङ्गिराः	पर्षद्या ब्राह्मणानां तु	(३)
	भविष्ये	चतुर्गुणं तु शूद्राणाम् ...	(१)
१५	चतुर्विंशतिमते	प्रायश्चित्तं यदाम्नातम्	(१ १/२)
	" (०)	श्रौताग्निधारका विप्राः	(६)
	धर्मविवृतौ	क्षत्रियो ह्यथ वैश्यो वा ...	(२)
१६	चतुर्विंशतिमते	श्वचर्मणि यथा क्षीरम्	(३)
	पराशरः	दुःशीलोऽपि द्विजः पूज्यो	(१)
	देवलः	स्वयं वा ब्राह्मणैः कृच्छ्रम्	(१)
	पराशरः	पापं प्रख्यापयेत पापी	१/२
	विष्णुः	पादव्रते वस्त्रदानम्	(१)
१७	मिताक्षरायाम्	इदं गोवृषदानम्	
	तत्रैव विष्णुः	तस्माद्द्विजः प्रत्यवायी	(१)
	मदनरत्ने	एतत् प्रकीर्णक ...	
	अङ्गिराः	वचः पूर्वमुदाहार्यम्	(२)
	स एव	ततस्तं प्रणिपातेन	(५ १/२)
१८	अङ्गिराः	आहूय श्रावयेदेकः	(१ १/२)
	देवलः	प्रायश्चित्तं यथोद्दिष्टम्	(१)
	बौधायनः	शरीरं बलमायुश्च	(१)
	०	अनर्चितैरनाहूतैः	(२)
१९	हारीतः	यथा वयो यथाकालं	(२)
	पराशरः	दुर्बलेऽनुग्रहः कार्यः	(२)
	०	प्रायश्चित्तं सदा दद्याद्	(१/२)
	हारीतः	प्रायश्चित्तं तु निर्दिश्य	(१)
	अङ्गिराः	कृत्वा सर्वमुदाहारम्	(३)
२०	पराशरः	स्नेहाद्वा यदि वा लोभात्	(१)
	०	शरीरस्यात्यये प्राप्ते	(१)
		स्वस्थस्य मूढाः कुर्वन्ति ..	(१)
	विष्णुः	सर्वपापेषु सर्वेषाम्	(४ १/२)

पृ. (३)

तृतीयप्रकरणे

पृ.	प्रामाणिकनामानि	प्रमाणप्रतीकाः	
२१	महार्णवे	व्रतं होम शोषरूपम्	
	माधवः	व्रतं नाम - - - -	
	मनुः	ख्यापनेनानुतापेन - - -	(१)
	भविष्ये	हिंसात्मकानां सर्वेषाम् - - - -	(१)
	मनुः	वधं दानेन निर्णिक्तम् - - - -	(१)
	संवर्त्तप्रोक्ते सामान्यप्रायश्चित्ते	हिरण्यदानं गोदानम् - - -	(१)
२२	यमः	शोषणेन शरीरस्य - - - -	(१)
	मनुः	कृत्वा पापं हि संतप्य - - -	(१)
	विष्णुपुराणे	प्रायश्चित्तान्यशेषाणि - - - -	(१)
	०	एवं विषयभेदाद्वै - - - -	(२)
	महाभारते	यद्यकार्यशतं कृत्वा - - - -	(१)
	जाबालिः	आरम्भे सर्वकृच्छ्राणाम् - - - -	(१)
२३	विष्णुः	श्राद्धं कुर्याद्व्रतान्ते च - -	(१/२)
	०	विधाय वैष्णवं श्राद्धम् - - -	(१)
	वसिष्ठः	कृच्छ्राणां व्रतरूपाणाम् - - -	(२)
	पराशरः	प्राजापत्यं चरेत्कृच्छ्रम् - - - -	(१)
	संवर्तस्मरणे	पादे ऽङ्गरोमवपनम् - - -	(१)
२४	हारीतः	राजा वा राजपुत्रो वा - - -	(२)
	प्रायश्चित्तमुक्तावलीकाराः	विद्वद्विप्रनृपस्त्रीणाम् - - -	(१)
	विज्ञानेश्वरः	महापातकादि - - - -	
	ग्रन्थे	महापातकादौ - - - -	
	पैठीनसिः	द्वादशाहे संपूर्णे वपनम् - - -	
	याज्ञवल्क्यः	कुर्वीत त्रिषवणस्नायी - - - - - -	(१)
२५	?	न्यूने पादव्रते वस्त्रम् - - -	(१/४)
	वसिष्ठः	केशानां नास्ति वपनम् - - -	(२)
	पराशरः	वपनं नैव नारीणाम् - - -	(४ १/२)
	देवलः	मुण्डनं चोपवासश्च - -	(१/२)
	?	वेण्यां वेणीप्रदानेन - - -	(१/४)
२६	अपरार्के	उदङ्मुखः पूर्वमुखो - - -	(२)
	तैत्तिरीयके ब्राह्मणे प्रथमकाण्डे पञ्चमप्रपाठके चातुर्मास्यप्रकरणे	देवा वै यद्यज्ञे - - - - - - -	

(तृतीयप्रकरणे)

पृ.	प्रमा.	प्रमाणप्र.	
२७	मनुना तत्रैव	मनुष्यं प्रक्रम्य ------	
	?	क्षौरं नैमित्तिकं कार्यम् ---	(१)
	वृद्धगार्ग्य:	रव्यारसौरिवारेषु ----	(१)
	व्यास:	नक्षत्रे तु न कुर्वीत ------	(२)
	[illegible]रायण:	सिंहे धनुषि मीने च --	(१)
२८	व्यास:	विवाहमौञ्जीचूडासु ----	(२)
	?(देवल:)	स्त्रीणां होमो न कर्त्तव्य: ----	(१/२)
	~~मदनरत्ने~~	अग्न्येनैव हि शालाग्नौ ---	(१/२)
मयूखकार:	~~[illegible]~~	स्त्रीणां होम: कृताकृत: ----	(१/२)
प्रायश्चित्तेन्दुशेखरे	पराशर:	उपवासो व्रतं होम-इत्यादि तद्द्वारा कर्त्तव्य:	(१)
२९	वराहवचनम्	अमन्त्रस्य तु शूद्रस्य ------	१/२
	देवल,पराशरवचने	स्त्रीणां होमो न कर्तव्य: ---	(१
	०	पञ्चगव्यं तु कुर्वीत ---	(१/२)
	अत्रिवचनम्	पञ्चगव्यं पिवञ्छूद्रो ---	(१)
३०	लिङ्गपुराणे	ईशानेन शिरोदेशम् ----	(१ १/२)
	? (श्रुति:)	ईशान: सर्वविद्यानाम् ---	(१)
	?	ईशानाय नम:	
	विष्णु:	अप्रमग्निति स्मृत्वा ---	(१)
	कूर्मपुराणे	गोमयस्य प्रमाणं तु	(१ १/२)
	शिवपुराणे	अश्वक्रान्त इति स्मृत्वा ----	(२)
३१	योगी	अलाभे तु मृदाङ्गानि ---	(१/२)
	जमदग्नि:	अश्वक्रान्तेति वै शुद्धाम् ----	(१ १/२)
	कूर्मपुराणे	मृत्तिका च समुद्दिष्टा ---	(१/२)
	ब्राह्मे	आयुष्काम: शिरोलोपम् --------	(१)
	पारस्कर:	एकधा तु शिर: क्षाल्यम् -----	(२)
३२	योगी	मृद्भिरद्भिश्च गात्राणि -----	(२ १/२)
	ब्रह्माण्डपुराणे	आपो अस्मानिति स्नुत्वा ----	(१)
	महार्णवे	वैकल्पिकौ द्वौ मन्त्रौ ----	
	प्रायश्चित्तेन्दुशेखरे पञ्चगव्यस्नानानि उक्तानि		
	मात्स्ये	सावित्र्यादाय गोमूत्रम् ------	(२)
३३	पाराशर्ये	तेजोऽसि शुक्रमित्याज्यम् ----	(१)
	?	१--- पञ्चगव्यं पिवेत्तत: ---	
	?	पञ्चगव्यमृचा पूतम् ---	
	?	मलापकर्षणं कार्यम् ----	(१/२)
	जमदग्नि:	हिरण्यशृङ्ग वरुणम् -----	(१ १/२)

तृतीयप्रकरणे

पृ०	प्रामाणिकनामानि	प्रमाणप्रतीकाः	
२४	शङ्खः	प्रायश्चित्तमुपासीनो -----	(२)
	अपरार्के	उपस्पर्शः स्नानम्	
	विज्ञानेश्वरः	दिवातिष्ठी --- (वीरासनलक्षणम्)	
	शूलपाणिः	~~[illegible]~~ अङ्घ्राद्यनाश्रयेण ----	($\frac{1}{2}$)
	मनुः	स्थानासनाभ्यां विहरेत् ----	($\frac{1}{2}$)
	वसिष्ठः	महाव्याहृतिभिर्होमः -----	(१)
	~~[illegible]~~	आपो हि ष्ठेति सूक्तं तु - -	(१ $\frac{1}{2}$)
२५	वैशम्पायनः	ऋषभं विरजं चैव -----	(१ $\frac{1}{2}$)
	०	स्नात्वोपतिष्ठेदादित्यम् -------	($\frac{1}{2}$)
	गौतमः	रौरवयौधाजये नित्यं प्रयुञ्जीत।	
	वह्निपुराणमते	जपहोमादि यत् किंचित् ---	(१)
	हारीतः	सूर्याय देवताभ्यो वै ------	($\frac{1}{2}$)
	अपरार्के	अग्ने व्रतम् ---	(१)
	पराशरः	प्रायश्चित्तेषु सर्वेषु ---	२
२६	प्रायश्चित्तविवेके	प्रायश्चित्तमन्यद्वारापि कार्यम्	
	ब्राह्मे	रोगी वृद्धस्तु पौगण्डः ...	($\frac{1}{2}$)
	पराशरः	व्याधिव्यसनविश्रान्ते ----	(१)
	०	पञ्चगव्यं पिबेच्छूद्रो -----	(१)
	यमः	प्रायश्चित्ते व्यवसिते ----	(१)
२७	अङ्गिराः	यदर्थमाचरेद्धर्मम् ----	(१)
	छागलेयः	सर्वं व्रतं गृहीत्वा तु	(१)
	वायवीये	लोभान्मोहात् प्रमादाद्वा ---	(१ $\frac{1}{2}$)
	० [illegible]	उरसा शिरसा दृष्ट्या ---	(१)
	० ~~[illegible]~~	विप्राः इच्छन्ति किं कार्यम् ---	(४ $\frac{1}{2}$)
२८	०	उपायनस्य संकल्पम् ---	(१) २
	पराशरः	पापं प्रक्षालयेत् पापी ---	(१)
~~५१~~	~~०~~	~~ब्रह्महत्यादि पापानि~~ --	
~~५३~~	~~प्रायश्चित्तेन्दुशेखर-प्र- प्रभ्यो उपदिष्टो ... यश्चित्त मुक्तावल्यादौ~~		
	०	यानि कानि च पापानि --	

तृतीय प्र०

पृ०	प्रमा०	प्रमा०	
	१	किंचित्पापं न गृह्णेत ...	(१)
३९	१	आब्रह्मस्तम्बपर्यन्तम् ...	(४)
	१	अ्रोमद्य ...	
	१		
४१	१	ब्रह्महत्यादिपापानि ...	(२)
४३	प्रायश्चित्तेन्वष्टेश्वर प्रा०- यश्चित्त मुक्तावल्यादौ	सम्येवमुपदिष्टो ...	
	१	यानि कानि च पापानि ...	(१)
४४	अङ्गिरो वचनम्	सभर्तृकाणां स्त्रीणां च ...	(१)
	१	कक्षागुह्यशिरः श्मश्रु ...	(१)
	१	आयुर्बलं यशो वचः ...	(१)
	१	मुखदुर्गन्धिनाशाय ...	(१)
	१	ईशानः सर्वविद्यानाम् ...	(१)
	मन्त्रः		
४५	१ मन्त्रभागप्रतीकाः (श्रुति)	अग्रमग्रं चरन्तीनाम् ...	(१ १/२)
	१	गन्धद्वाराम् ...	(१)
	श्रु०	बलिस्था पर्वतानाम् ...	(१)
	१०	मा वो रिषत ...	(१)
४६	१	स्योना पृथिवी नो भव ...	(१)
	श्रु०	अश्वक्रान्ते ...	(१)
		अयने ते ...	(१)
		त्रातारम् ...	(१)
		यमाय मधुमत्तमम् ...	(१)
४७	१	तन्त्वा यामि ...	(१)
		वयं सोम ...	(१)
		तत् सूर्यं रोदसी ...	(१)
		अथः पश्यसि ...	(१)
		सहस्रशीर्षा ...	(१)

तृ॰ प्र॰

पृ॰ प्रमा·· प्रमा॰·:

अक्षिभ्यां ते -- (१)
ग्रीवाभ्यस्त --- (१)
आन्त्रेभ्यस्ते -- (१)
नाभ्या नाभिन्न -- (१)
त्वमिन्द्र स्तजोवसम् -- (१)
सोमानं स्वरणं -- (१)
यः कुक्षिः सोम -- (१)

४९ बह्वीनां पिता --- (१)
ऊरूभ्यां ते -- (१)
मेदना द्वनम् ·· (१)
आमा वाजस्य -- (१)
यस्मिन् विश्वानि --- (१)
अङ्गादङ्गाल्लोम्नो ---- (१)

५० इदं विष्णुः -- (१)
अश्वक्रान्ते --- (१)
मृत्तिके हर मे पापम् -- (१)
इमं मे गङ्गे --- (१)
ऋतं च --- (१)

५१ आपो हि ष्ठा --- (१)
इदमापः प्रवहत — (१)
गन्धद्वाराम् --- (१)

५२ आप्यायस्व --- (१)
दधिक्राव्णो --- (१)
घृतं मिमिक्षिरे --- (१)
तेजोसि --- (१)
देवस्य त्वा -- (१)
आप्यायस्व सोमाय नमः

५३ मधु वाता --- (३)
दधिक्राव्णो
[illegible] नमः
तेजोसि रवये नमः

(८)

त. प्र.

पृ.	ग्राम..	प्रमाण.
५४		ओषधी: सर्ववृक्षाणाम्-- (ओषधीभ्योनमः) (१)
		या ओषधी.. ( )
		धान्योषधी -- . (१)
		धान्यमसि (सर्वधान्येभ्योनमः) ( )
५५		देवस्यत्वाभि- समुद्रस्य... (सूक्तम्)
५६		सहस्रशीर्षा - . . . (१६ ऋचं सूक्तम्)
		ततः षोडशभिर्मन्त्रैः
५८		नमोऽस्त्वनन्ताय -- (१)
		मन्त्रहीनं क्रियाहीनम्--(१)
५९		गवामङ्गेषु तिष्ठन्ति -- (१)
६०		इरावती -- (१)
		इदं विष्णुः -- (१)
		मानस्तोके--. (१)
		एन्द्र इन्द्राग्नी (१)
		अग्नये
		सोमाय
६१		तत्सवितुः-- (१)
		प्रणवश्च--- (१)
		ओं भूर्भुवः ---
		अग्नये --
६२	।	नरकभीतिनिवृत्त्यर्थं ---(३)
६३	।	आरम्भे सर्वकृच्छ्राणां ---(१)
		गवामङ्गेषु -- (१)
		प्रायश्चित्तं प्रकर्तव्यम् ---(३)
६४		एवं करोति यः सम्यक् ---(२)

इति तृतीयस्य प्रमाणसूची [illegible] समाप्ता॥ संपूर्णम्

(३ पैप्र०)